गोपीरतो रुक्मनखधारी हारी जगद्गुरुः ।
जानुजङ्घान्तरालस्थ पीताम्बरधरो हरिः ॥ ३५ ॥
हैयङ्गवीनसम्भोक्ता पायसाशो गवां गुरुः ।
ब्रह्मण्यो ब्रह्मणाऽऽराध्यो नित्यं गोविप्रपालकः ॥ ३६ ॥
भक्तप्रियो भक्तलभ्यो [3]भक्त्यातीतो भुवाङ्गतिः ।
भूर्लोकपाता हर्त्ता च भूगोलपरिचिन्तकः ॥ ३७ ॥
नित्यं भूर्लोकवासी च जनलोकनिवासकः ।
तपोलोकनिवासी च वैकुण्ठो विष्टरस्रवाः ॥ ३८ ॥
विकुण्ठवासी वैकुण्ठवासी हासी रसप्रदः ।
रसिकागोपिकानन्ददायको बालधृग्वपुः ॥ ३९ ॥
यशस्वी यमुनातीरपुलिनेऽतीवमोहनः ।
वस्त्रहर्त्ता गोपिकानां मनोहारी वरप्रदः ॥ ४० ॥
दधिभक्षो दयाधारो दाता पाता हुताहुतः ।
मण्डपो मण्डलाधीशो राजराजेश्वरो विभुः ॥ ४१ ॥
विश्वधृक् विश्वभुक् विश्वपालको विश्वमोहनः ।
विद्वत्प्रियो वीतहव्यो हव्यगव्यकृताशनः ॥ ४२ ॥
कव्यभुक् पितृवर्त्ती च कव्यात्मा कव्यभोजनः ।
रामो विरामो रतिदो रतिभर्त्ता रतिप्रियः ॥ ४३ ॥
प्रद्युम्नोऽक्रूरदम्यश्च क्रूरात्मा क्रूरमर्द्दनः ।
कृपालुश्च दयालुश्च शयालुः सरितां पतिः ॥ ४४ ॥

---

[3] भक्त्या नीत इति समीचीनः पाठः ॥